Roll No. ....................

# 936

## कक्षा 9वीं परीक्षा, 2021-22

[229003-F]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 80]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (1×7=7)

(क) 'बाला' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) टाप् (ii) ङाप्

(iii) चाप् (iv) आप

(ख) "पठित्वा" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) क्त्वा (ii) क्तवतु

(iii) तुमुन् (iv) क्त

(ग) 'विहाय' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) तुमुन् (ii) ल्यप्

(iii) क्तिन् (iv) शानच्

(घ) "मध्यमा अङ्गुलिः" इत्यस्मिन् वाक्ये विशेषणपदम् अस्ति –

(i) मध्यमा (ii) अङ्गुलिः

(iii) पदे (iv) कोऽपि नास्ति



https://www.mpboardonline.com

(ङ) "चक्षुषि भास्करे ततो" इत्यस्मिन् वाक्ये विशेषणम् अस्ति –

(i) चक्षुषि (ii) भास्करे

(iii) ततो (iv) कोऽपि न

(च) "हितैषिभिः मन्त्रिभिः" इत्यस्मिन् विशेष्यपदम् अस्ति –

(i) हितैषिभिः (ii) सर्वाः

(iii) मन्त्रिभिः (iv) कोऽपि न

(छ) "अहम् दीर्घां कथाम् पठामि" इत्यस्मिन् वाक्ये विशेष्यपदं किम्?

(i) अहम् (ii) दीर्घाम्

(iii) कथाम् (iv) पठामि

प्र.2 रिक्तस्थानानि पूरयत – (1X7=7)

(क) 'इन्द्रः' इत्यस्य पर्यायपदं ..........................................। (शक्रः / नगेन्द्र)

(ख) 'रात्रिः' इत्यस्य पर्यायपदं ..........................................। (निशा / नृपः)

(ग) 'उपकारः' इत्यस्य विलोमपदं ..........................................। (अपकारः / उत्थानः)

(घ) 'विजयः' इत्यस्य विलोमपदं ..........................................। (अजयः / पराजयः)

(ङ) वणिक्पुत्रस्य नाम किम् ..........................................। (जीर्णधनो / शीर्णधनो)

(च) कः प्रियः अपि त्याज्यः ..........................................। (सज्जनः / दुष्टः)

(छ) स्वजनः कुत्र प्रहरति ..........................................। (हृदये / अरिः)

प्र.3 युग्ममेलनं कुरुत – (1X6=6)

| | (अ) | | (ब) |
|---|---|---|---|
| (i) | रामस्य | – | चतुर्थी एकवचनम् |
| (ii) | फलानाम् | – | उप |
| (iii) | लतायै | – | षष्ठी बहुवचनम् |
| (iv) | उपकरोति | – | षष्ठी एकवचनम् |
| (v) | अनुगच्छन् | – | संज्ञापदं |
| (vi) | भोपालनगरम् | – | अनु |



https://www.mpboardonline.com

प्र.4 एकवाक्येन उत्तर लिखत – (1×6=6)

(क) "गच्छति" क्रियापदे का धातुः अस्ति?

(ख) "रामः धावति" इत्यस्मिन् वाक्ये किं धातुपदं अस्ति?

(ग) 'हस्' धातोः लट्लकारस्य उत्तमपुरुषस्य द्विवचनस्य रूपं लिखत।

(घ ) "गजः शनैः शनैः चलति" इत्यस्मिन् वाक्ये अव्ययपदं किम्?

(ङ) "कोलाहलं मा कुरु" इत्यस्मिन् वाक्ये अव्ययपदं किम्?

(च) "सः विद्यालयं गच्छति" इत्यस्मिन् वाक्ये सर्वनामपदं किम् अस्ति?

प्र.5 शुद्धवाक्यानां समक्षे 'आम्' अशुद्ध वाक्यानां समक्षे 'न' लिखत – (1×6=6)

(क) "सदैव" वृद्धिसन्धेः उदाहरणम् अस्ति।

(ख) महाः + औषधिः "महौषधिः" भवति।

(ग) "सुरेशः" यण् सन्धेः उदाहरणम् अस्ति ।

(घ) अन्य पद प्रधानः बहुव्रीहिः समासः अस्ति।

(ङ) समासाः षड् भवन्ति।

(च) "घनश्यामः" पदे कर्मधारयः समासः वर्तते।

प्र.6 स्वर्णकाकः कान् अखादत्? (2)

<u>अथवा</u>

कविः कां सम्बोधयति?

प्र.7 वित्ततः क्षीणः कीदृशः भवति? (2)

<u>अथवा</u>

कविः कीदृशी वीणां निनादयितुम् प्रार्थयति?



https://www.mpboardonline.com

प्र.8 सज्जनानाम् मैत्री कीदृशी भवति? (2)

अथवा

पुरुषः सिकताभिः किं करोति?

प्र.9 लोकरक्षा कथं सम्भवति? (2)

अथवा

अनधीतः तपोदत्तः कैः गर्हितोऽभवत्?

प्र.10 बालः कदा क्रीडितुम् अगच्छत्? (2)

अथवा

जीमूतवाहनः कीदृशः आसीत्?

प्र.11 प्रकृतेः प्रमुखतत्त्वानि कानि सन्ति? (2)

अथवा

जीमूतवाहनः कस्य पुत्रः आसीत्?

प्र.12 माहेश्वर सूत्राः कति सन्ति? (2)

अथवा

"प" वर्णस्य उच्चारणस्थानं किम्?

प्र.13 अधोलिखितानि कथनानि कः कं प्रति कथयति – (कोऽपि द्वे) (2)

(i) अहं तुभ्यम् तण्डुलमूल्यं दास्यामि।

(ii) हा विधे! किमिदं मया कृतम्।

(iii) तण्डुलान् मा भक्षय।



https://www.mpboardonline.com

प्र.14 रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणम् कुरुत – (कोऽपि द्वे) (2)

(i) धनदृष्ट्या कोऽपि दरिद्रः न तिष्ठत।

(i) गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

(iii) चटकः स्वकर्मणि व्यग्रः आसीत्।

प्र.15 अशुद्धकारक संशोधनम् कुरुत – (कोऽपि द्वे) (2)

(i) वृक्षं पत्राणि पतन्ति।

(ii) श्रीगणेशं नमः।

(iii) बालकः कन्दुकें क्रीडति।

प्र.16 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

'पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्– 'सूर्यातपे तण्डुलान् खगेभ्यो रक्ष'। किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्ः। नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्व दृष्ट। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा।

(i) ग्रामे का न्यवसत्?

(ii) दुहिता कीदृशी आसीत्?

(iii) माता पुत्रीं किम् आदिशत्?



https://www.mpboardonline.com

अथवा

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुला आसीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनम् अवदत् "भो श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला" सोऽवदत् – 'भोः! नास्ति सा, त्वदीया तुला मूषकैः भक्षिता।"

(i) तुला कीदृशी आसीत्?

(ii) तुला कैः भक्षिता आसीत्?

(iii) वणिक्पुत्रः कुत्र प्रस्थितः?

प्र.17 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

प्रियवाक्य प्रदानेन, सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं, वचने च दरिद्रता।।

(i) किं वक्तव्यम्?

(ii) जन्तवः केन तुष्यन्ति?

(iii) तस्मात् इति पदे किं वचनम्?

अथवा

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः।।

(i) किं यत्नेन संरक्षेद्?

(ii) कस्मात् क्षीणः मानवः हतः?

(iii) के येति याति च?



https://www.mpboardonline.com

प्र.18 अधोलिखितं नाट्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत – (3)

मल्लिका – भोः! अत्र पूजनं न भविष्यति। अहं स्वसखीभिः सह श्वः प्रातः काशीविश्वनाथ–मन्दिरं गमिष्यामि, तत्र गंगास्नानं धर्मयात्राञ्च वयं करिष्यामः।

चन्दनः – सखिभिः सह! न मया सह!

मल्लिका – आम्। चम्पा, गौरी, माया, मोहनी, कपिलादयः सर्वाः गच्छन्ति। अतः, मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः। तावत्, गृह–व्यवस्थां, धेनोः दुग्धदोहन–व्यवस्थाञ्च परिपालय।

(i) मल्लिका पूजार्थं सखीभिः सह कुत्र गच्छति स्म?

(ii) कस्याः दुग्धदोहनम् परिपालय?

(iii) मल्लिका कदा प्रत्यागमिष्यति?

अथवा

भ्रान्तः कश्चन् बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्। तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानमं प्राविशत्। https://www.mpboardonline.com

(i) कः तन्द्रालु भवति?

(ii) बालः कदा क्रीडितुम् अगच्छत्?

(iii) बालस्य मित्राणि किमर्थं त्वरमाणाः अभवन्?

प्र.19 प्रदत्तशब्दैः पाठगत रिक्तस्थानानि पूरयत – (3)

(घट, वृद्धा, कल्पतरु वृक्षः, गुणाः)

(i) एका निर्धना ......................स्त्री न्यवसत्।

(ii) गुणाः गुणज्ञेषु................................भवन्ति।

(iii) कुम्भकारः ...............................रचयति।

(iv) तस्य उद्याने ............................ आसीत्।

प्र.20 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकस्य सूक्तिमौक्तिकम् पाठात् सुभाषितद्वयं श्लोक लेखनं करणीयः। (4)



https://www.mpboardonline.com

प्र.21 स्वस्य प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृतभाषयां लिखत। (4)

अथवा

पितरौ प्रति परीक्षायाः परिणाम सूचना पत्रम् संस्कृतभाषायां लिखत।

प्र.22 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (4)

(कोऽपि चत्वारः)

आदिगुरोः शङ्कराचार्यस्य जन्म केरलप्रान्ते कालडीनामके ग्रामे अभवत्। तस्य पितुः नाम शिवगुरुः मातुः च नाम आर्याम्बा आसीत्। तस्य पिता तस्य जन्मनः पूर्वमेव मृतः। तस्य माता एव पुत्रस्य पालनं पोषणं अकरोत। जन्मना एव सः प्रतिभा सम्पन्नः आसीत्। अतः स एव कुलोचिताः समस्ताः विद्या सपदि श्व आधीतवान्।

(i) आदिगुरोः शङ्कराचार्यस्य जन्म स्थानं किम् वर्तते?

(ii) शङ्कराचार्यस्य पितुः नाम किम् आसीत्?

(iii) माता कस्य पालनं पोषणम् अकरोत्?

(iv) 'कालडी' नामकं ग्रामं कस्मिन् प्रान्ते आसीत्?

(v) शङ्कराचार्यस्य मातुः नाम किम्?

प्र.23 अधोलिखितेषु विषयेषु एकस्य विषये निबंध लेखनं संस्कृतभाषायां लिखत – (4)

(i) संस्कृत भाषयाः महत्त्वम्

(ii) पर्यावरणम्

(iii) महाकविः कालिदासः

(iv) अस्माकं देशः

(v) परोपकारः

---



https://www.mpboardonline.com